# Prachetobhih Kritam Vishnu Stotram

# પ્રચેતોભિઃ કૃતં વિષ્ણુસ્તોત્રમ્

## Document Information

Text title : Prachetobhih Kritam Vishnu Stotram

File name : prachetobhiHkRRitaMviShNustotram.itx

Category : vishhnu, vishnu, bhAgavatapurANa, stotra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : bhAgavatapurANa | adhyAya 4/30/22-42||

Latest update : September 23, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

September 23, 2025

*sanskritdocuments.org*

# પ્રચેતોભિઃ કૃતં વિષ્ણુસ્તોત્રમ્

પ્રચેતસ ઊચુઃ ।
નમો નમઃ ક્લેશવિનાશનાય
નિરૂપિતોદારગુણાહ્વયાય ।
મનોવચોવેગપુરોજવાય
સર્વાક્ષમાર્ગૈરગતાધ્વને નમઃ ॥ ૨૨॥

શુદ્ધાય શાન્તાય નમઃ સ્વનિષ્ઠયા
મનસ્યપાર્થં વિલસદ્દ્વયાય ।
નમો જગત્સ્થાનલયોદયેષુ
ગૃહીતમાયાગુણવિગ્રહાય ॥ ૨૩॥

નમો વિશુદ્ધસત્ત્વાય હરયે હરિમેધસે ।
વાસુદેવાય કૃષ્ણાય પ્રભવે સર્વસાત્વતામ્ ॥ ૨૪॥

નમઃ કમલનાભાય નમઃ કમલમાલિને ।
નમઃ કમલપાદાય નમસ્તે કમલેક્ષણ ॥ ૨૫॥

નમઃ કમલકિઞ્જલ્કપિશઙ્ગામલવાસસે ।
સર્વભૂતનિવાસાય નમોઽયુઙ્ક્ષ્મહિ સાક્ષિણે ॥ ૨૬॥

રૂપં ભગવતા ત્વેતદશેષક્લેશસઙ્ક્ષયમ્ ।
આવિષ્કૃતં નઃ ક્લિષ્ટાનાં કિમન્યદનુકમ્પિતમ્ ॥ ૨૭॥

એતાવત્ત્વં હિ વિભુભિર્ભાવ્યં દીનેષુ વત્સલૈઃ ।
યદનુસ્મર્યતે કાલે સ્વબુદ્ધ્યાભદ્રરન્ધન ॥ ૨૮॥

યેનોપશાન્તિર્ભૂતાનાં ક્ષુલ્લકાનામપીહ તામ્ ।
અન્તર્હિતોઽન્તર્હૃદયે કસ્માન્નો વેદ નાશિષઃ ॥ ૨૯॥

અસાવેવ વરોઽસ્માકમીપ્સિતો જગતઃ પતે ।
પ્રસન્નો ભગવાન્ યેષામપવર્ગગુરુર્ગતિઃ ॥ ૩૦॥

વરં વૃણીમહેઽથાપિ નાથ ત્વત્પરતઃ પરાત્ ।
ન હ્યન્તસ્ત્વદ્વિભૂતીનાં સોઽનન્ત ઇતિ ગીયસે ॥ ૩૧॥

પારિજાતેઽઞ્જસા લબ્ધે સારઙ્ગોઽન્યન્ન સેવતે ।
ત્વદઙ્ઘ્રિમૂલમાસાદ્ય સાક્ષાત્કિં કિં વૃણીમહિ ॥ ૩૨॥

યાવત્તે માયયા સ્પૃષ્ટા ભ્રમામ ઇહ કર્મભિઃ ।
તાવદ્ભવત્પ્રસઙ્ગાનાં સઙ્ગઃ સ્યાન્નો ભવે ભવે ॥ ૩૩॥

તુલયામ લવેનાપિ ન સ્વર્ગં નાપુનર્ભવમ્ ।
ભગવત્સઙ્ગિસઙ્ગસ્ય મર્ત્યાનાં કિમુતાશિષઃ ॥ ૩૪॥

યત્રેડ્યન્તે કથા મૃષ્ટાસ્તૃષ્ણાયાઃ પ્રશમો યતઃ ।
નિર્વૈરં યત્ર ભૂતેષુ નોદ્વેગો યત્ર કશ્ચન ॥ ૩૫॥

યત્ર નારાયણઃ સાક્ષાદ્ભગવાન્ ન્યાસિનાં ગતિઃ ।
સંસ્તૂયતે સત્કથાસુ મુક્તસઙ્ગૈઃ પુનઃ પુનઃ ॥ ૩૬॥

તેષાં વિચરતાં પદ્ભ્યાં તીર્થાનાં પાવનેચ્છયા ।
ભીતસ્ય કિં ન રોચેત તાવકાનાં સમાગમઃ ॥ ૩૭॥

વયં તુ સાક્ષાદ્ભગવન્ ભવસ્ય
પ્રિયસ્ય સખ્યુઃ ક્ષણસઙ્ગમેન ।
સુદુશ્ચિકિત્સ્યસ્ય ભવસ્ય મૃત્યો-
ર્ભિષક્તમં ત્વાદ્ય ગતિં ગતાઃ સ્મ ॥ ૩૮॥

યન્નઃ સ્વધીતં ગુરવઃ પ્રસાદિતા
વિપ્રાશ્ચ વૃદ્ધાશ્ચ સદાનુવૃત્ત્યા ।
આર્યા નતાઃ સુહૃદો ભ્રાતરશ્ચ
સર્વાણિ ભૂતાન્યનસૂયયૈવ ॥ ૩૯॥

યન્નઃ સુતપ્તં તપ એતદીશ
નિરન્ધસાં કાલમદભ્રમપ્સુ ।
સર્વં તદેતત્પુરુષસ્ય ભૂમ્નો
વૃણીમહે તે પરિતોષણાય ॥ ૪૦॥

મનુઃ સ્વયમ્ભૂર્ભગવાન્ ભવશ્ચ
યેઽન્યે તપોજ્ઞાનવિશુદ્ધસત્ત્વાઃ ।

અદૃષ્ટપારા અપિ યન્મહિમ્નઃ
સ્તુવન્ત્યથો ત્વાત્મસમં ગૃણીમઃ ॥ ૪૧॥

નમઃ સમાય શુદ્ધાય પુરુષાય પરાય ચ ।
વાસુદેવાય સત્ત્વાય તુભ્યં ભગવતે નમઃ ॥ ૪૨॥

ઇતિ શ્રીમદ્ભાગવતમહાપુરાણે ચતુર્થસ્કન્ધે ત્રિંશાધ્યાયાન્તર્ગતં
પ્રચેતોભિઃ કૃતં વિષ્ણુસ્તોત્રં સમાપ્તમ્ ।

ભાગવતપુરાણ । અધ્યાય ૪/૩૦/૨૨-૪૨॥

bhAgavatapurANa . adhyAya 4/30/22-42..

Proofread by PSA Easwaran

*Prachetobhih Kritam Vishnu Stotram*
pdf was typeset on September 23, 2025

Please send corrections to *sanskrit@cheerful.com*